ODM EDUCATIONAL GROUP
Changing your Tomorrow

# संस्कृतम्

CHANGING YOUR TOMORROW

Website: www.odmegroup.org
Email: info@odmps.org
Toll Free: **1800 120 2316**
Sishu Vihar, Infocity Road, Patia, Bhubaneswar- 751024

# तृतीयः पाठः

# गोदोहनम्

ODM EDUCATIONAL GROUP
Changing your Tomorrow

एतत् नाट्यांशं कृष्णचन्द्रत्रिपाठिमहोदयैः रचितात् 'चतुर्व्यूहम्' इति पुस्तकात् संक्षिप्य सम्पाद्य च उद्धृतम्। अस्मिन् नाटके एतादृशस्य जनस्य कथानकम् अस्ति यः धनवान् सुखाकाखी च भवितुम् इच्छुकः मासपर्यन्तं दुग्धदोहनादेव विरमति, येन मासान्ते धेनोः शरीरे सञ्चितं पर्याप्तं दुग्धम् एकवारमेव विक्रीय सम्पत्तिमर्जयितुं समर्थः भवेत्। परं मासान्ते यदा सः दुग्धदोहनाय प्रयतते तदा सः दुग्धबिन्दुम् अपि न प्राप्नोति। दुग्धप्राप्तिस्थाने सः धेनोः प्रहारैः रक्तरञ्जितः भवति, अवगच्छति च यत् दैनन्दिनं कार्यं यदि मासपर्यन्तं संगृह्य क्रियते तदा लाभस्य स्थाने हानिरेव भवति।

ODM EDUCATIONAL GROUP
Changing your Tomorrow

*(प्रथमं दृश्यम्)*

*(मल्लिका मोदकानि रचयन्ती मन्दस्वरेण शिवस्तुतिं करोति)*

*(ततः प्रविशति मोदकगन्धम् अनुभवन् प्रसन्नमना चन्दनः।)*

**चन्दनः** – अहा! सुगन्धस्तु मनोहरः (विलोक्य) अये मोदकानि रच्यन्ते? (प्रसन्नः भूत्वा) आस्वादयामि तावत्। (मोदकं गृहीतुमिच्छति)

**मल्लिका** – (सक्रोधम्) विरम। विरम। मा स्पृश! एतानि मोदकानि।

**चन्दनः** – किमर्थं क्रुध्यसि! तव हस्तनिर्मितानि मोदकानि दृष्ट्वा अहं जिह्वालोलुपतां नियन्त्रयितुम् अक्षमः अस्मि, किं न जानासि त्वमिदम्?

**मल्लिका** – सम्यग् जानामि नाथ! परम् एतानि मोदकानि पूजानिमित्तानि सन्ति।

**चन्दनः** – तर्हि, शीघ्रमेव पूजनं सम्पादय। प्रसादं च देहि।

**मल्लिका** – भो! अत्र पूजनं न भविष्यति। अहं स्वसखिभिः सह श्वः प्रातः काशीविश्वनाथमन्दिरं प्रति गमिष्यामि, तत्र गङ्गास्नानं धर्मयात्राञ्च वयं करिष्यामः।

**चन्दनः** – सखिभिः सह! न मया सह! (विषादं नाटयति)

**मल्लिका** – आम्। चम्पा, गौरी, माया, मोहिनी, कपिलाद्याः सर्वाः गच्छन्ति। अतः, मया सह तवागमनस्य औचित्यं नास्ति। वयं सप्ताहान्ते प्रत्यागमिष्यामः। तावत्, गृह व्यवस्थां, धेनोः दुग्धदोहनव्यवस्थाञ्च परिपालय।

ODM EDUCATIONAL GROUP
Changing your Tomorrow

**अतिरिक्तप्रश्ना: -**

१. क: मोदकानि रचयति ?

२. मोदकम् खादितुम् क: व्यग्र: आसीत् ?

३. मोदकानाम् गन्धं कञ्जदृशं अस्ति ?

४. विरम विरम इति सक्रोधम् क: कथयति ?

५. क: जिह्वालोलुपतां नियन्त्रयितुं अक्षम: अस्ति ?

ODM EDUCATIONAL GROUP
Changing your Tomorrow

**प्रकृतिप्रत्ययं विभज्य लिखत –**

१. करणीयम् = ............... + ............. ।

२. विक्रिय = ............... + ............. ।

३. पठितम् = ............... + ............. ।

४. ताडयित्वा = ............... + ............. ।

५. दोग्धुम् = ............... + ............. ।

ODM EDUCATIONAL GROUP
Changing your Tomorrow

**<u>सन्धिविच्छेदं :-</u>**

मनोहरः, शीघ´मेव, गङ्गा, सप्ताहान्ते, प्रत्यागमिषामि, *तवागमनम्*, नास्ति, इत्यादयः।

## गहकार्यम — दश सन्धिविच्छेदं प्रकतिप्रत्ययं च कत्वा आनय।

# धन्यवाद:

## ओ.डि.एम्. एजुकेशनल ग्रुप्

ODM EDUCATIONAL GROUP
Changing your Tomorrow